महता वासवः प्रत्यपद्यत । शक्र उवाच । पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् । ब्राह्मणानां गवाञ्चैव सुहृदाञ्चार्थसाधकम् । दुर्हृदां शोकजननं सर्व्वबान्धवनन्दनम् । सुतं तेऽग्र्यं प्रदास्यामि सर्व्वामित्रविनाशनम् । इत्युक्तः कौरवो राजा वासवेन महात्मना । उवाच कुन्तीं धर्म्मात्मा देवराजवचः स्मरन् । उदर्कस्तव कल्याणि ! तुष्टो देवगणेश्वरः । दातुमिच्छति ते पुत्रं यथा सङ्कल्पितं त्वया । अतिमानुषकर्म्माणं यशस्विनमरिन्दमम् । नीतिमन्तं महात्मानमादित्यसमतेजसम् । दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् । पुत्रं जनय सुश्रोणि ! धाम क्षत्रियतेजसाम् । लब्धः प्रसादो देवेन्द्रात् तमाह्वय शुचिस्मिते ! । वैशम्पायन उवाच । एवमुक्ता ततः शक्रमाजुहाव यशस्विनी । अथाजगाम देवेन्द्रो जनयामास चार्ज्जुनम्" । कुन्त्या अपत्यं ढक् । कौन्तेय तदपत्ये "कौन्तेय प्रतिजानीहि" गीता ।

**कुन्थ** क्लेशे श्लेषे च क्र्यादि० प०स्क०सेट् । कुथ्नाति अकुन्थीत् चुकुन्थ प्रनिकुथ्यात् । [ न्तरम् ।

**कुन्थु** पु० कुन्थ–उन् । बौद्धभेदे हेमच० कुन्थुरवेति पाठा-

**कुन्द** पु० कुन्द इव श्वेतत्वात्, कुं पृथिवीं कश्यपाय ददाति दा–क वा । १विष्णौ तस्य कुन्दोपमाङ्गत्वात् स्वच्छतया स्फटिकवन्निर्मलत्वात् "श्वेतोरक्तस्तथा पीत इदानीं कृष्णतां गतः" इत्युक्तेः युगावतारे सत्ययुगे श्वेतत्वाद्वा, परशुरामावतारे कश्यपाय भूमिदानाद्वा तथात्वम् । यथाह हरिवंशे "सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान् । तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः । मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम्" । कुं भूमिमुनत्ति उन्द–अण् शक०, कौतेः अव्दा० दन् मुमच् वा । २कुन्दुरुनामगन्धद्रव्ये ३भ्रमियन्त्रभेदे (कुँद) ४कुवेरस्य निधिभेदे च पु० मेदि० ५करवीरवृक्षे पु० राजनि० स्वनामख्याते ख्याते ६पुष्पप्रधानवृक्षे पुंन० पुष्पे न०अमरः । "कुन्दं शीतं लघु श्लेष्मशिरोरुग्वातपित्तहृत्" भावप्र० । "कुन्दकुड्मलाग्रदतः स्मितैः" माघः । "कुन्देन्दुसुन्दररुचिः" सा० द० । "शङ्कराय न दातव्याः कुन्दशेफालिकाजवाः" पुरा० । ७पद्मे च कुन्दिनी त्रिका० । शाल्मलद्वीपस्थे दवर्ष पर्व्वतभेदे । शाल्मलद्वीपवर्णने भाग० ५, २०अ० । "तेषु वर्षेष्वद्रयो नद्यश्च सप्तैवाभिज्ञाताः सुरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति" । विष्णुपु० तु एषां नामान्तराणि दृश्यन्ते "कुमुदश्चोन्नतश्चैव तृतीयश्च वलाहकः । द्रोणोयत्र महौषध्यः स चतुर्थो महीधरः । कुन्दस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा । कुमुद्वान् पर्व्वतवरः" अनयोः कल्पभेदादविरोधः ।

**कुन्दक** पु० कुन्द+संज्ञायां कन् । १कुन्दवृक्षे राजनि० स्वार्थे क । २कुन्दशब्दार्थे

**कुन्दम** पुंस्त्री० कुन्देन मीयते शुभ्रवर्णत्वात् मा–घञर्थे क । विड़ाले त्रिका० स्त्रियां जातित्वात् ङीष् । तस्य च प्राणिभिन्नषष्ठ्यन्तात् परस्य चूर्णा०तत्पुरुषे आद्युदात्ततातत्र गणे सुकुन्द इति पाठान्तरम् । तेन सह श्रेण्यादित्वात् तत्पुरुषः ।

**कुन्दमाला** स्त्री ग्रन्थभेदे सा०द० ।

**कुन्दर** पु० कुन्दवत् शुद्धानि धर्म्मानुबन्धीनि फलानि राति ददाति रा–क, कुं धरां दारयति हिरण्याक्षजिघांसया वराहरूपावतारे दृ–अच् पृषो० मुम् । १विष्णौ । "कुमुदः कुन्दरः कुन्दः" विष्णुस० । कुं भूमिं दारयति अन्तर्भूतण्यर्थे दृ–अच् पृषो० । कलिङ्गेषु (कुन्दरा) विख्याते २तृणभेदे पु०राजनि०; तस्य पर्य्यायोक्तिद्वारा लक्षणं राजनि० दर्शितम् । "कण्डुरो दीर्घपत्रः खरच्छदः रसालक्षेत्रसंभूतः मृगवल्लभः" । "ज्ञेयं कुन्दरमूलन्तु स्थौल्यशैत्योपकारकम् । पित्तातिसारनाशि स्यात् गोधनानां प्रशस्यते । बलपुष्टिकरञ्चैव" राजनि० तद्गुणा उक्ताः । [ समूहे त्रिका० ।

**कुन्दिनी** स्त्री कुन्दानां पद्मानां समूहः खला० इनि । पद्म-

**कुन्दु** पु० कुं भूमिं दृणाति दृ वा०डु । १मूषिके शब्दरत्ना० । २कुन्दुरुनाम गन्धद्रव्ये स्त्री ।

**कुन्दुर** पु० कुं भूमिं दारयति दृ–विदारे उरन् पृषो० । कुन्दुरुनामगन्धद्रव्ये भरतः ।

**कुन्दुरु** पुंस्त्री कुं भूमिमुनत्ति उन्द–उलु बा० नि० । स्वनामख्याते गन्धद्रव्यभेदे अमरः । "कुन्दुरुर्मधुरस्तीक्ष्णस्त्वच्यः कटुर्हरेत् । ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान्" भावप्र० । स्वार्थे क । तत्रैव पुंस्त्री राजनि० । स च सुश्रुते एलादिगणे पठितः । स च गणो यथा

"एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुका व्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकबालकगुग्गुलुसर्जरसतुरुष्ककुन्दरुकाऽगुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति । एलादिको वातकफौ निहन्याद्विषमेव च । वर्णप्रसादनः कण्डूपिटकाकोठनाशनः", ।